# श्री देवी अपराध क्षमापण स्तोत्रं

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातः त्वदनुसरणं क्लेश हरणम् ॥ १॥

विधे रज्ञानेन द्रविण विरहे णालस तया
विधे याशक्यत्वात् तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरल तरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचित मिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३॥

जगन्मातर् मातः तव चरण सेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत् प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४॥

परित्यक्ता देवा विविध विध सेवा कुलतया
मया पञ्चा शीतेः अधिक मपनीते तु वयसि ।

इदानीं चेन् मातः तव यदि कृपा नापि भविता
निरालम्बो लम्बोदर जननि कं यामि शरणम् ॥ ५॥

श्वपाको जल्पाको भवति मधुपाकोपम गिरा
निरातङ्को रङ्को विहरति चिरं कोटि कनकैः ।
तवापर्णे कर्णे विशति मनु वर्णे फल मिदं
जनः को जानीते जननि जननीयं जपविधौ ॥ ६॥

चिता भस्मा लेपो गरल मशनं दिक्पट धरो
जटाधारी कण्ठे भुजग पतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैक पदवीं
भवानि त्वत् पाणि ग्रहण परिपाटी फलमिदम् ॥ ७॥

न मोक्षस् याकाङ्क्षा भव विभव वाञ्छापि च न मे
न विज्ञाना पेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥ ८॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्ष चिन्तन परैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपा मुचित मम्ब परं तवैव ॥ ९॥

आपत्सु मग्नः स्मरणं त्वदीयं
करोमि दुर्गे करुणार्णवेशि ।

नैतच् छठत्वं मम भावयेथाः
क्षुधा तृषार्ता जननीं स्मरन्ति ॥ १०॥

जगदम्ब विचित्र मत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराध परम्परा परं न हि माता समुपेक्षते सुतम् ॥ ११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥ १२॥ ॐ ॥

इति श्री देवी अपराध क्षमापण स्तोत्रं सम्पूर्णम् ।